# Nityanandasvamivirachitam Ruchira Stotram

# નિત્યાનન્દસ્વામિવિરચિતં રુચિરસ્તોત્રમ્

## Document Information

Text title : Nityanandasvamivirachitam Ruchira Stotram

File name : nityAnandasvAmivirachitaMruchirastotram.itx

Category : vishhnu, svAminArAyaNa, krishna

Location : doc_vishhnu

Author : nityAnandasvAmi

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# નિત્યાનન્દસ્વામિવિરચિતં રુચિરસ્તોત્રમ્

(તોટકવૃત્તમ્)
પરમાદ્ભુત-દિવ્યવપૂ રુચિરં
રુચિરેઙ્ઘ્રિતલેઙ્ગુલયો રુચિરાઃ ।
નખમણ્ડલમિન્દુનિભં રુચિરં
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૧॥

પ્રપદે રુચિરે પ્રસૃતે રુચિરે
મૃદુ જાનુયુગં રુચિરં રુચિરમ્ ।
કરિહસ્ત-નિભોરુયુગં રુચિરં
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૨॥

કટિપુષ્ટ-નિતમ્બયુગં રુચિરં
નતનાભિકજં જઠરં રુચિરમ્ ।
મૃદુલૌ સ્તનનીલમણી રુચિરૌ
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૩॥

હૃદયં રુચિરં પૃથુતુઙ્ગમુરઃ-
સ્થલમંસયુગં રુચિરં રુચિરૌ ।
કરભૌ કરકઞ્જતલે રુચિરે
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૪॥

ભુજદણ્ડ-યુગં રુચિરં ચિબુકં
વિધુમોદકરં વદનં રુચિરમ્ ।
રસના રુચિરા દશના રુચિરા
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૫॥

જલજોપમ-કણ્ઠશિરો રુચિરં
તિલપુષ્પ-નિભા સુનસા રુચિરા ।
અધરૌ રુચિરાવલિકં રુચિરં

રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૬॥

અરુણે ચપલે નયને રુચિરે
સ્મરચાપનિભે મુનિ-શાન્તિકરે ।
ભ્રુકુટી રુચિરે શ્રવણૌ રુચિરૌ
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૭॥

હરિચન્દન-ચર્ચિત-મઙ્ગમલં
તિલકં રુચિરં કુસુમાભરણમ્ ।
બહુશસ્તિલકા રુચિરાશ્ચિકુરા
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૮॥

સિતસૂક્ષ્મ-ઘનં વસનં રુચિરં
મુનિરઞ્જનકં વચનં રુચિરમ્ ।
અવલોકન-માભરણં રુચિરં
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૯॥

સ્નપનં રુચિરં તરણં રુચિરં
ભરણં રુચિરં શરણં રુચિરમ્ ।
રમણં રુચિરં શ્રવણં રુચિરં
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૧૦॥

કથનં રુચિરં સ્મરણં રુચિરં
મનનં રુચિરં સ્તવનં રુચિરમ્ ।
વિનયો રુચિરો ઘટનં રુચિરં
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૧૧॥

અશનં રુચિરં મુખવાસ ઇહા-
ચમનં રુચિરં નમનં રુચિરમ્ ।
જલપાનમહો રુચિરં શયનં
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૧૨॥

ગમનં રુચિરં દમનં રુચિરં
શમનં રુચિરં જપનં રુચિરમ્ ।
તપનં રુચિરં યજનં રુચિરં
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૧૩॥

હવનં રુચિરં યમનં રુચિરં
ભજનં રુચિરં ત્યજનં રુચિરમ્ ।
ભવનં રુચિરં સદનં રુચિરં
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૧૪॥

જનની રુચિરા જનકો રુચિરઃ
સ્વજના રુચિરા મુનયો રુચિરાઃ ।
બટવો રુચિરાઃ પદગા રુચિરા
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૧૫॥

અવનં રુચિરં રુચિરં રચનં
હરણં રુચિરં રુચિરં કરણમ્ ।
પઠનં રુચિરં રુચિરં રટનં
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૧૬॥

વયુનં રુચિરં દ્રઢભક્તિવિરા-
ગસદાચરણં રુચિરં રુચિરાઃ ।
પરિષન્ નિજભક્તજના રુચિરા
રુચિરાધિપતે રખિલં રુચિરમ્ ॥ ૧૭॥

હરિકૃષ્ણ મુદાર-મનન્તમજં
પ્રણતાર્તિહરં જલદાભતનુમ્ ।
કરુણાર્દ્રદ્રશં વૃષભક્તિસુતં
નમનં વિદધે સુચિરં રુચિરમ્ ॥ ૧૮॥

ઇદમર્થભૃતં મુનિ-નિત્યકૃતં
રુચિરં સ્તવનં જનતા-પવનમ્ ।
શ્રુતમાત્ર-મનોમલ-નાશકરં
જન-તાપહરં ભવતીષ્ટકરમ્ ॥ ૧૯॥

ઇતિ શ્રીનિત્યાનન્દસ્વામિવિરચિતં રુચિરસ્તોત્રં સમ્પૂર્ણમ્ ।

*Nityanandasvamivirachitam Ruchira Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*